# Lesson 6: Exercise Pages 94 - 98

Sanskrit to English

1. केनचिद् ब्राह्मणेन श्राद्धं दातुं[दा inf] आह्वानं नरेश्वरात् लब्धम्[लभ् PPP 1/1] ।
   By a Brahman an invitation to perform a śrāddha was received from the king.

---

2. यस्मात् तस्य भार्या तस्मिन् काले गृहे न अभवत् तस्मात् बालस्य रक्षार्थं तत्र न अन्यः अतिष्ठत् ।
   Since his wife was not at home at that time, therefore no other stood there for the protection of (his) child.

---

3. यदि सत्वरं न गच्छामि तदा अन्यः कश्चिद् आह्वानं ग्रहीष्यति[ग्रह् P fut III/1] इति चिन्तयित्वा तेन द्विजेन दीर्घं कालं पालितं[पाल् PPP 2/1] नकुलं मम बालस्य रक्षार्थं अवस्थापयामि इति निर्णीतम्[निर्-नी PPP 1/1] ।
   Having thought, “If I do not go quickly, then someone else will get the invitation” by that twice-born, “The mongoose (that has been) protected for a long time I leave behind for the protection of (my) child” was decided.

---

4. अनन्तरं एकः सर्पः बालस्य समीपं आगम्य नकुलेन दृष्टः[दृश् PPP 1/1] व्यापादितः[वि-आ-पद् c-PPP 1/1] च ।
   Thereupon a snake, having come to the vicinity of the child, was seen by the mongoose and destroyed.

---

5. श्राद्धं कृत्वा तेन ब्राह्मणेन गृहं प्रत्यागम्य रक्तेन विलिप्तं[वि-लिप् PPP 2/1] नकुलं अवलोक्य मम पुत्रः नकुलेन भक्षितः[भक्ष् PPP 1/1] इति चिन्तयित्वा सः नकुलः लगुडेन हतः[हन् PPP 1/1] ।
   Having performed the śrāddha, having returned home, having seen the mongoose smeared with blood, (and) having thought, “My son (has been) eaten by the mongoose,” the mongoose was killed with a club by the Brahman.

---

6. सः सहसा एव पञ्चत्वं गतः[गम् PPP 1/1] ।
   It ‘went to five-ness’ immediately indeed.

---

7. ततः ब्राह्मणः पुत्रं शय्यायां सुस्थं दृष्ट्वा महत्[2/1] पापं मया[3/1] कृतं[कृ PPP 1/1] इति विदित्वा परमं विषादं गतः ।
   Thereafter, having seen (his) son safe and sound in (his) bed, having understood, “A great evil (has been) done by me,” the Brahman went to supreme despair.

---

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva

English to Sanskrit

1. एकदा कश्चिद् दरिद्रः ब्राह्मणः देशस्य नृपात् श्राद्धं दातुं आह्वानं लब्ध्वा यदि प्रासादं सहसा न गच्छामि तदा अन्यः कश्चिद् श्राद्धं ग्रहीष्यति इति अचिन्तयत् नृपस्य प्रासादं च अगच्छत् ।

---

2. यस्मात् तस्य भार्या मन्दिरं पूजार्थं गता तस्मात् बालस्य रक्षार्थं ब्राह्मणात् अन्यः न कश्चिद् गृहे अतिष्ठत् ।

---

3. ततः दीर्घं कालं पालितं नकुलं अत्र अवस्थापयामि प्रासादं च गच्छामि इति अचिन्तयत् ।

---

4. अनन्तरं बालस्य समीपं गतः सर्पः नकुलेन दृष्टः सहसा च व्यापादितः ।

---

5. यदा सः ब्राह्मणः गृहं प्रत्यागम्य रक्तेन च विलिप्तं नकुलं दृष्ट्वा मम पुत्र तेन भक्षितः इति चिन्तयित्वा नकुलं शीर्षे अतुदत् ।

---

6. सः सपदि पञ्चत्वं गतः ।

---

7. यदा सः द्विजः शय्यायां सुप्तं सुस्थं च पुत्रं अपश्यत् तदा पापया क्रियया परमं विषादं गतः दीर्घं कालं च अनुतापेन आक्रान्तः ।

---

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva